ऽतिरिक्ता वा साध्येष्वपि न सिध्यति । यात्युदीर्णं शमयति नान्यं व्याधिं करोति च । सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् । (व्रणप्रश्ने) प्रागभिहितोऽग्निरन्नस्य पाचकः । स चतुर्व्विधो भवति दोषानभिपन्न एको विक्रियामापन्नस्त्रिविधो भवति विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्व्वसाम्यादिति । तत्र यो यथा कालमन्नमुपयुक्तं सम्यक् पचति । स समः समैर्दोषैः । यः कदाचित्सम्यक् पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा । स विषमः । यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः स एवाभिवर्द्धमानोऽत्यग्निरित्याभाष्यते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकान्ते च गलताल्वोष्ठशोषदाहसन्तापान् जनयति । यः स्वल्पमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्रसेकच्छर्द्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः । विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् । करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् । तत्र समे परिरक्षणं कुर्व्वीत, विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्व्वीत, तीक्ष्णे मधुरस्निग्धशीतैर्व्विरेकैश्च, एवमेवात्यग्नौ विशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्व्वमनैश्च । जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते । प्राणापानसमानैस्तु सर्व्वतः पवनैस्त्रिभिः । ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः । वयस्तु त्रिविधम् बालम् मध्यम् वृद्धमिति । तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति ॥ षोडशसप्तत्योरन्तरे मध्यम् वयस्तस्य विकल्पो वृद्धिर्यौवनम् संपूर्णता हानिरिति । तत्र विंशतेर्वृद्धिः, आ त्रिंशतो यौवनम्, आ चत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्धमीषत् परिहाणिर्य्यावत्सप्ततिरिति ॥ सप्ततेरूर्द्धं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानम् सर्व्वक्रियास्वसमर्थम् जीर्णागारमिवाभिवृष्टमवसीदन्तम् वृद्धमाचक्षते ॥ तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणेस्तत्राद्यापेक्षया प्रतिकुर्वीत । भवन्ति चात्र ॥ बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु । भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥ अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत् । तत्साध्येषु विकारेषु मृद्वीम् कुर्य्यात्क्रियाम् शनैः ॥ देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः । कर्शयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ । रक्षणञ्चैव मध्यस्य कुर्व्वीत सततम् भिषक् ॥ बलमभिहितगुणम् दौर्ब्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम् ॥ यस्माद्बलवतः सर्व्वक्रियाप्रवृत्तिस्तस्माद्बलमेव प्रधानमधिकरणानाम् ॥ केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः । तस्मात् स्थिरत्वव्यायामैर्ब्बलं वैद्यः प्रतर्कयेत् ॥ सत्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्ववैकल्यकरम् । सत्त्ववान् सहते सर्व्वं संस्तभ्यात्मानमात्मना । राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः ॥ प्रकृतिम् भेषजम् चोपरिष्टाद्वक्ष्यामः ॥ सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति । यो रसः कल्पते यस्य सुखायैव निषेवितः । व्यायामजातमन्यद्वा तत्सात्म्यमिति निर्दिशेत् ॥ देशस्त्वानूपो जाङ्गलः साधारण इति ॥ तत्र बहूदकनिम्नोन्नतनदीवर्षगहनो मृदुशीतानिलो बहुमहापर्व्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चानूपः ॥ आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः ॥ उभयदेशलक्षणः साधारण इति ॥ भवन्ति चात्र ॥ समाः साधारणे यस्माच्छीतवर्षोष्ममारुताः । दोषाणाम् समता जन्तोस्तस्मात्साधारणो मतः ॥ न तथा बलवन्तः स्युर्जलजा वा स्थलाहृताः । स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः ॥ उचिते वर्त्तमानस्य नास्ति देशकृतम् भयम् । आहारस्वप्नचेष्टादौ तद्देशस्य गुणे सति । देशप्रकृतिसात्म्यर्त्तुविपरीतोऽचिरोत्थितः । सम्पत्तौ भिषगादीनां बलसत्वायुषां तथा ॥ केवलः समदेहाग्नेः सुखसाध्यतमो गदः । अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्यामिश्रलक्षणः ॥ क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् । पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥ गुणालाभेऽपि सपदि यदि सैव क्रिया हिता । कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि ॥ य एवमेनं विधिमेकरूपं बिभर्त्ति कालादिवशेन धीमान् । स मृत्युपाशान् जगतो गदौघान् छिनत्ति भैषज्यपरश्वधेन" ॥

**आतुरोपद्रव** पुं० ६त० । आतुरस्य उपद्रवे ते च उपद्रवाः संप्रतीकारोपायाः सुश्रुते दर्शिता यथा